# सुन्दरकाण्ड अष्टाविंशः सर्गः(२८) - ॥ उद्बन्धन व्यवसायः ॥

सा राक्षसेन्द्रस्य वचो निशम्य
तद् रावणस्या प्रियम प्रियार्ता ।
सीता वितत्रास यथा वनान्ते
सिंहाभि पन्ना गजराज कन्या ॥ १ ॥

सा राक्षसी मध्य गता च भीरुः
वाग्भि भृशं रावण तर्जिता च ।
कान्तार मध्ये विजने विसृष्टा
बालेव कन्या विललाप सीता ॥ २ ॥

सत्यं बतेदं प्रवदन्ति लोके
नाकाल मृत्युर् भवतीति सन्तः ।
यत्राह मेवं परिभर्त्स्य माना
जीवामि किञ्चित् क्षण मप्य पुण्या ॥ ३ ॥

सुखाद् विहीनं बहुदुःख पूर्णम्
इदं तु नूनं हृदयं स्थिरं मे ।
विशीर्यते यन्न सहस्रधाऽद्य
वज्राहतं शृङ्ग मिवाचलस्य ॥ ४ ॥

नैवास्ति दोषं मम नूनमत्र
वध्याऽहमस्या प्रिय दर्शनस्य ।
भावं न चास्याह मनुप्रदातुम्
अलं द्विजो मन्त्र मिवा द्विजाय ॥ ५ ॥

नूनं ममाङ्गान् यचिराद नार्यः
शस्त्रैः शितैश् छेत्स्यति राक्षसेन्द्रः ।
तस्मिन् ननागच्छति लोकनाथे
गर्भस्थ जन्तो रिव शल्य कृन्तः ॥ ६ ॥

दुःखं बतेदं मम दुःखिताया
मासौ चिरायाधि गमिष्यतो द्वौ ।
बद्धस्य वध्यस्य तथा निशान्ते
राजापराधा दिव तस्करस्य ॥ ७ ॥

हा राम हा लक्ष्मण हा सुमित्रे
हा राममातः सह मे जनन्या ।
एषा विपद्याम् यहमल्प भाग्या
महार्णवे नौरिव मूढ वाता ॥ ८ ॥

तरस्विनौ धारयता मृगस्य
सत्त्वेन रूपं मनुजेन्द्र पुत्रौ ।
नूनं विशस्तौ मम कारणात्तौ
सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९ ॥

नूनं स कालो मृग रूपधारी
मामल्प भाग्यां लुलुभे तदानीम् ।
यत्रार्य पुत्रं विससर्ज मूढा
रामानुजं लक्ष्मण पूर्वजं च ॥ १० ॥

हा राम सत्यव्रत दीर्घ बाहो
हा पूर्ण चन्द्र प्रतिमान वक्त्र ।

हा जीवलोकस्य हितः प्रियश्च
वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥

अनन्य देवत्व मियं क्षमा च
भूमौ च शय्या नियमश्च धर्मे ।
पतिव्रतात्वं विफलं ममेदं
कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

मोघो हि धर्मश्चरितो मयाऽयं
तथैक पत्नीत्व मिदं निरर्थम् ।
या त्वां न पश्यामि कृशा विवर्णा
हीना त्वया सङ्गमने निराशा ॥ १३ ॥

पितुर् निदेशं नियमेन कृत्वा
वनान् निवृत्तश् चरितव्रतश्च ।
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः
त्वं रंस्यसे वीतभयः कृतार्थः ॥ १४ ॥

अहं तु राम त्वयि जातकामा
चिरं विनाशाय निबद्ध भावा ।
मोघं चरित्वाऽथ तपोव्रतं च
त्यक्ष्यामि धिग्जीवित मल्प भाग्या ॥ १५ ॥

सा जीवितं क्षिप्र महं त्यजेयं
विषेण शस्त्रेण शितेन वाऽपि ।
विषस्य दाता न हि मेऽस्ति कश्चित्
शस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥

शोकाभि तप्ता बहुधा विचिन्त्य
सीताऽथ वेण्युद् वेण्युद् ग्रथनं गृहीत्वा ।
उद्बध्य वेण्युद् ग्रथनेन शीघ्रम्
अहं गमिष्यामि यमस्य मूलम् ॥ १७ ॥

उपस्थिता सा मृदु सर्व गात्री
शाखां गृहीत्वाऽथ नगस्य तस्य ।
तस्यास्तु रामं प्रविचिन्तयन्त्या
रामानुजं स्वं च कुलं शुभाङ्ग्याः ॥ १८ ॥

शोका निमित्तानि तथा बहूनि
धैर्यार्जितानि प्रवराणि लोके ।
प्रादुर् निमित्तानि तदा बभूवुः
पुराऽपि सिद्धान् युपलक्षितानि ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥